# टिळक महाराष्ट्र विद्यापीठ, पुणे

22E

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**
**परीक्षा: डिसेंबर – २०२३**
**सत्र १ ले**
**विषय: स्वप्नवासवदत्त (22E312)**

**दिनांक: ०९/१२/२०२३** **गुण : १००** **वेळ : स. १०.०० ते १.००**

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १.अ) अनुवादं कुरुत।** **(२०)**

१) पद्मावती नरपतेर्महिषी भवित्री दृष्टा विपत्तिरथ यै: प्रथमं प्रदिष्टा।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्यान्युत्क्रम्य गच्छति विधि: सुपरीक्षितानि।।

२) दु:खं त्यक्तुं बद्धमूलोऽनुराग: स्मृत्वा स्मृत्वा याति दु:खं नवत्वम्।
यात्रा त्वेषा यत् विमुच्येह बाष्पं प्राप्तानृण्या याति बुद्धि: प्रसादम्।।

३) स्मराम्यवन्त्याधिपते: सुताया: प्रस्थानकाले स्वजनं स्मरन्त्या:।
बाष्पं प्रवृत्तं नयनान्तलग्नं स्नेहान्ममेवोरसि पातयन्त्या:।।

४) प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ किं वक्ष्यतीति हृदयं परिशङ्कितं मे।।

**प्र. २. ससन्दर्भं स्पष्टीकुरुत ।** **(२०)**

अ) जानामि, जानामि, अयमपि जन: एवामुन्मादित:।

ब) उपरता तस्य भार्या तन्निष्प्रयोजनमिति।

क) वासवदत्ताबद्धं न तु तावन्मे मनो हरति।

ड) ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथ:।

**प्र.३. अ) संधिविग्रहं कुरुत ।** **(०५)**

अ) परिवर्तमानोऽयम् ब) गुम्फत्वार्या क) अमात्यैर्महता
ड) देहान्तरेष्वपि इ) दिष्ट्येदानीम्

**ब) समासविग्रहं कृत्वा समासप्रकारं लिखत ।** **(०५)**

अ) अदग्धा ब) वसुधातलम् क) श्रुतपूर्व:
ड) नतोन्नता इ) आकाशवादितम्

**प्र.४. अ) संक्षिप्ता: टिप्पणी: लिखत । (०३)** **(१५)**

अ) नान्दी ब) वसन्तक: क) घोषवती वीणा
ड) यौगन्धरायण: इ) भरतवाक्यम्

**ब) द्वौ परिच्छेदौ लिखत ।** **(२०)**

अ) वासवदत्ता ब) स्वप्नप्रसङ्ग: क) प्रमदवनप्रसङ्ग:

**प्र. ५. सविस्तरं निरूपणं कुरुत ।** **(१५)**

‘स्वप्नवासवदत्तस्य दाहकोऽभून्न पावक:।’

------------